शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)
साहित्यदर्पणः सप्तम परिच्छेदः

रसानां विरोध प्रकाराः के? तत्समावेशश्च एकस्मिन् पद्ये कथं कर्तुं युक्त्या शक्यते इति प्रतिपादनम्।

ननु 'आद्यः करुण, रौद्र, वीर, भयानकैः' इति उक्तत्वेन विरोधिनोः वीर शृङ्गारयोः कथम् एकत्र —

'कपोले जानक्याः करिकलभदन्तद्युतिमुषि
स्मरस्मेरस्फारोड्डमरपुलकं वक्त्रकमलम्।
मुहुः पश्यन् शृण्वन् रजनिचरसेनाकलकलं
जटाजूटग्रन्थिं द्रढयति रघूणां परिवृढः ॥'

इत्यादौ समावेशः?

अत्रोच्यते - इह एवं मीमांसा व्यतिकर समये, खलु रसानां विरोधितायाः अविरोधितायाश्च त्रिधा व्यवस्था —
(1) कयोश्चित् आलम्बनैक्येन,
(2) कयोश्चित् आश्रयैक्येन,
(3) कयोश्चित् आनन्तर्येण।

तत्र वीर शृङ्गारयोः आलम्बनैक्येन विरोधः। तथा= आलम्बनैक्येन हास्य रौद्र बीभत्सैः सम्भोग शृङ्गारस्य, वीर करुण रौद्र भयानक बीभत्सैः विप्रलम्भ शृङ्गारस्य, आलम्बनैक्येन आश्रयैक्येन च वीरभयानकयोः। नैरन्तर्ये विभावैक्याभ्यां शान्त शृङ्गारयोः। त्रिधा अपि विरोधो वीरस्याद्भुत रौद्राभ्याम्। शृङ्गारस्य अद्भुतेन, भक्ति भयानकस्य बीभत्सेन इति।

तेनात्र 'कपोले जानक्याः' इत्यस्मिन् पद्ये वीर शृङ्गारयोः भिन्न आलम्बनत्वात् न विरोधः। एवञ्च वीरस्य नायकनिष्ठत्वेन भयानकस्य प्रतिनायकनिष्ठत्वेन निबद्धे भिन्नाश्रयत्वेन न विरोधः। यच्च नागानन्दे प्रशमाश्रयस्यापि जीमूतवाहनस्य मलयवत्यनुरागो दर्शितः, तत्र 'अहो गीतमहो वादित्रम्' इति अद्भुतस्य अन्तरा निवेशनात् न आनन्तर्याभावात् न शान्त शृङ्गारयोः विरोधः। एवम् अन्यद् अपि ज्ञेयम्।

अलमतिविस्तरेण।

डॉ० कृष्णा
२४/८/२०
सहा० प्रो० साहित्य
रा० उ० सं० महावि०
कुरुक्षेत्र, हरियाणा

शास्त्री प्रथम वर्षस्य कृते साहित्यम्
(साहित्य दर्पणः द्वितीयः परिच्छेदः)

---

वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः
इति कारिकायाः साधु व्याख्या।

---

आचार्य विश्वनाथेन काव्य लक्षणे 'वाक्यं रसात्मकं काव्यम्' इति प्रोक्तम्। तत्र किं नाम वाक्यं इति अपेक्षायां आह — 'वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः' इति। योग्यतादि त्रयात्मकः पद समूह एव वाक्यमित्यर्थः। तत्र योग्यता — 'पदार्थानां परस्पर सम्बन्धे बाधाभावः' एक पदार्थस्य अपर पदार्थेन सह सम्बन्धे बाधाऽभाव एव योग्यता। यथा — 'जलेन सिञ्चति' इत्यत्र जल पदार्थस्य अन्य पदार्थेन सह यः सम्बन्धः स बाधितो न वर्तते इति योग्यतायाः सत्वाद् वाक्यत्वं भवति। न च बाध-सत्वेऽपि यत्र पदार्थानां परस्परं सम्बन्धो वर्तते तत्रापि वाक्यत्वं स्यादिति वाच्यम्। यथा 'वह्निना सिञ्चति' इत्यस्यापि वाक्यत्वं स्यात्। नहि अग्निः सेचन क्रियायां समर्थः, अपितु दहन क्रियायाम्। अतो नेदं वाक्यम्।

आकाङ्क्षा — एक पदार्थस्य अपरपदार्थेन सह अन्वय अपेक्षा आकाङ्क्षा। सा च श्रोतुः जिज्ञासा रूपा, यथा 'देवदत्तो ग्रामं याति' इत्यत्र याति इति पदस्य निराकाङ्क्षत्वं वाक्यत्वे गौः अश्वः पुरुषो, हस्ती इति परस्परं निरपेक्षत्वं पद समूहस्यापि वाक्यत्वं स्यात्। एवं च अतिव्याप्तिः स्यात्। अत्र गवादि अर्थबोधकं सुबन्त पदं श्रवणानन्तरम् अश्वादि पदान्तरं श्रवणेच्छा विरहस्य सिद्धत्वात् आकाङ्क्षा शून्यत्वम्। अतो नेदं वाक्यम्।

आसत्तिः — यस्य पदार्थस्य येन पदार्थेन सह सम्बन्धापेक्षा तेन सह तस्य अव्यवधानेन स्थितिः आसत्तिः। व्यवहितेऽपि बुद्धविच्छेदरूपं देवदत्त शब्दस्य दिनान्तरोच्चारितेन गच्छति इति पदेन सङ्गतिः स्यात्। किन्तु ईदृशेन पद समूहेन न भवति बोधः, आसत्ति विरहात्। न चेदं वाक्यम्।

व्यवधानं द्विविधम् — एकं कालव्यवधानम्, अपरं च अनुपयुक्त पदानाम् उल्लेखः। प्रथमस्य उदाहरणं पूर्वं उक्तम्। तत्र 'काल व्यवधानात् देवदत्तेन सह'। द्वितीयस्य तु 'गिरिर्भुक्तमग्निमान् देवदत्तेन' अत्र 'गिरिरग्निमान्', देवदत्तेन भुक्तं न इति सम्बन्धः बुद्धिनिर्णीतिक्

---

उपेन्द्र राउत
अध्यापक
व्या० प्रो० साहित्य
श्री उ० सं० महाविद्यालय
पुरुषोत्तम, पुरी